**दिनाङ्कः 02/12/2025**

**सायम्- 06:20**

**<u>आदौ मुख्यवार्ता:</u>**

- अनेकेषु राज्येषु केन्द्रशासितप्रदेशेषु च मतदातृ-सूच्यां विशेष-गहन-संशोधनस्य (एस्. आई. आर.) विषये निरन्तरं विरोध प्रदर्शनात् लोकसभा अद्य दिवसपर्यन्ताय स्थगिता।
- संसदीयकार्यमन्त्री किरेन रिजिजूः अवदत् यत्, अस्मिन् मासे अष्टमे दिनाङ्के राष्ट्रियगीतस्य वंदे मातरम् इत्यस्य सार्धैक-शततमे वार्षिकोत्सवस्य अवसरे लोकसभायां विशेष-चर्चा भविष्यति।
- निर्वाचनायोगेन पश्चिम-बङ्गाल-राज्यस्य प्रायः अष्टोत्तरद्विशताधिक द्विसहस्र बूथ केन्द्रेषु शत-प्रतिशत-गणना-प्रपत्राणां प्रस्तुतीकरणविषये विस्तृतं प्रतिवेदनं याचितम्।
- काशी-तमिल-सङ्गमम् इत्यस्य चतुर्थ-संस्करणम् अद्य उत्तरप्रदेशस्य वाराणस्यां नमोघट्टे समारब्धम्।
- **अपि च,**
- चक्रवातः दित्वा अद्य दुर्बलः भूत्वा दाब क्षेत्रेण परिवर्तितः । ऋतु-विभागेन चेन्नई, तिरुवल्लूर्, चेङ्गलपट्टु, काञ्चीपुरम् इत्येतेषु मण्डलेषु आगामि चतुर्विंशति होरासु अतिवृष्टेः रक्त वर्णीया संचेतना प्रसारितास्ति।

---------

**<u>लोकसभास्थगनम्</u>**

अनेकेषु राज्येषु केन्द्रशासितप्रदेशेषु च मतदातृ-सूच्यां विशेष-गहन-संशोधनस्य (एस. आई. आर.) विषये निरन्तरं विरोध प्रदर्शनात् लोकसभा दिवसपर्यन्ताय स्थगिता। विपक्षस्य एस. आई. आर. विषये चर्चायाः आग्रहणानन्तरं, अन्ते दिवसपर्यन्तं स्थगनात् पूर्वं सभायां द्वौ स्थगनौ दृष्टौ। राज्यसभापि नियतकार्याणां

समाप्तेः अनन्तरं दिनपर्यन्तं स्थगिता। अपराह्णे द्विवादने द्वितीय-स्थगनस्यानन्तरं यदा लोकसभायाः उपवेशनं पुनः आरब्धं तदा विपक्षस्य सदस्याः पुनः मध्ये आगत्य एस्. आई. आर्. विरुद्धम् उद्घोषणं कृतवन्तः। पीठासीन-अधिकारिणः बारम्बारं निवेदनानंतरम् अपि विपक्षेण स्वप्रदर्शनं न स्थगितं, येन सभायाः कार्यमेव दिवसाय स्थगितम्। पूर्वं, यदा लोकसभायाः प्रथमस्य स्थगनस्य अनन्तरं मध्याह्ने द्वादश वादने सम्मेलनम् अभवत्, तदा काङ्ग्रेस, डी. एम. के., टी. एम. सी. इत्यादि दलानां विपक्षस्य सदस्याः मध्ये आगत्य प्रदर्शनं कृतवन्तः। संसदीयकार्यमन्त्री किरेन रिजिजुः विपक्षीय सदस्यैः सह आग्रहं कृतवान् यत् ते सभायाः कार्येषु विघ्नं न जनयन्तु इति । सः अवदत् यत् सर्वकारः सभायां कस्यापि विषये चर्चां कर्तुं सज्जः अस्ति। विपक्षस्य प्रदर्शनानन्तरं पीठासीन-अधिकारिणा निम्नसदनम् अपराह्णे द्विवादनं यावत् स्थगितम्।

-

**राज्यसभा-स्थगनम्**

राज्यसभायां, अपराह्णे द्विवादने प्रथमस्य स्थगनस्य अनन्तरं यदा सभा आरब्धा तदा संसदीयकार्यमन्त्री किरेन रिजिजुः पुनः उक्तवान् यत् निर्वाचन-परिष्कार विषये चर्चार्थं सर्वकारः सज्जः अस्ति इति। सभायां विपक्षस्य नेता मल्लिकार्जुन खर्गेः अवदत् यत्, एस.आई. आर. इत्यस्य सप्तषष्ठ्यधिक द्विशत नियमे प्राधान्येन चर्चां कर्तुं शक्यते। अत्रान्तरे, संसदा मणिपुर-वस्तु-सेवा-करः (द्वितीयं संशोधन) विधेयकं, विंशति पञ्चविंशति राज्यसभायां चर्चायाः अनन्तरं लोकसभां प्रति प्रत्यर्पितम्।

**रिजिजुः- चर्चा**

संसदीयकार्यमन्त्री किरेन रिजिजूः अवदत् यत्, अस्मिन् मासे अष्टमे दिनाङ्के राष्ट्रियगीतस्य वंदे मातरम् इत्यस्य सार्धैक-शततमे वार्षिकोत्सवस्य अवसरे लोकसभायां विशेष-चर्चा भविष्यति।

**प्रधानमंत्री - वेदमूर्ति**

शुक्ल-यजुर्वेदस्य मध्यान्दिनी-शाखायाः द्विसहस्रमन्त्रयुतं दण्डक्रम-पारायणं पञ्चाशत् दिनेषु विरामं विनैव सम्पन्नं कर्तुं वेदमूर्तये देवव्रत-महेश-रेखे वर्याय प्रधानमन्त्रिणा नरेन्द्रमोदिना अभिनन्दितम्। सामाजिकान्तर्जालीये सन्देशे श्रीमोदी उक्तवान् यत् ऊनविंशति वर्षीयः वेदमूर्तिदेवव्रत महेशः रेखे  यत् कृतवान् तत् आगामि-संततयः स्मरिष्यन्ति इति।

**निर्वाचनायोग:-पश्चिमबंगाल:**

निर्वाचनायोगेन पश्चिम-बङ्गाल-राज्यस्य प्रायः अष्टोत्तरद्विशताधिक द्विसहस्र बूथ इति केन्द्रेषु शतप्रतिशत-गणना-प्रपत्राणां प्रस्तुतीकरणविषये विस्तृतं प्रतिवेदनं याचितम्। एतेभ्यः केन्द्रेभ्यः किमपि असंकलनीय-पत्राणि न प्राप्तानि, यानि अवास्तविकानि इव दृश्यन्ते इति सः अवोचत्। मण्डल-निर्वाचन-अधिकारिभ्यः अद्य प्रातः दशवादन पर्यन्तं स्वस्य प्रतिवेदनानि समर्पयितुं निर्देशः प्रदत्तः आसीत्। भाजपेति दलेन आरोपितं यत् केचन राजनैतिक-प्रेरित-खण्ड-विकास-अधिकारिणः बूथ्-स्तरीय अधिकारिणां उपरि स्वस्य ओटिपि-इति संख्याः प्रेषयितुं पीडयन्तः सन्ति, येन  मृतानां, स्थानान्तरितानां, अवैध-बाङ्ग्लादेशी-प्रवासिनां च नामानि वर्तमान-एस. आई. आर.-प्रक्रियायां समावेशयितुं शक्यन्ते। निर्वाचन-आयोगेन नियुक्तः विशेष-अनुक्रमणिका-पर्यवेक्षकः सुब्रतगुप्ता, एस्. आई. आर्. प्रक्रियया सम्बद्धाः सङ्कटं परिहर्तुं जनैः, राजनैतिकदलैः, सङ्घटनैः च सह परामर्शं प्रारभत। ह्यः सी. पी. आई. (एम्) तथा काङ्ग्रेस्-दलस्य सदस्याः विशेष-रोल्-अब्जर्वर् इत्यनेन सह मिलित्वा स्वचिन्तां प्रकटितवन्तः।

**काशी-तमिल-सङ्गमम** ▯

काशी-तमिल-सङ्गमम् इत्यस्य चतुर्थ-संस्करणम् अद्य उत्तरप्रदेशस्य वाराणस्यां नमोघट्टे समारब्धम् । केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र-प्रधानः, उत्तरप्रदेशस्य मुख्यमन्त्री योगी-आदित्यनाथः च संयुक्तरूपेण अस्य कार्यक्रमस्य उद्घाटनं

कृतवन्तौ, यस्य उद्देश्यं उत्तर-दक्षिणयोः मध्ये सम्बन्धान् सुदृढं कर्तुम् अस्ति। अस्मिन् वर्षे कार्यक्रमस्य विषयः 'लेट्स लर्न तमिळ ऑर तमिल कर्कलम्' इति अस्ति। गत रविवासरे स्वस्य 'मन की बात' इत्यस्मिन् कार्यक्रमे प्रधानमन्त्री उक्तवान् यत्, काशी-तमिल-सङ्गमम् इतीदं तमिळ्-भाषया सम्बद्धानां सर्वेषां कृते महत्त्वपूर्णं मञ्चः अभवदिति।

प्रधानमन्त्री नरेन्द्रमोदी अद्य काशी-तमिळ्-सङ्गमम् इत्यस्य आरम्भाय शुभाशयाः प्रेषितवान्। सामाजिकान्तर्जालीये सन्देशे श्रीमोदी उक्तवान् यत् अयं जीवन्तः कार्यक्रमः एकभारत, श्रेष्ठभारत इत्यस्य भावं सुदृढं करोति इति। कार्यक्रमावधौ नागरिकाणां काशी-वासः चिरस्मरणीयवासः भवेदिती प्रधानमन्त्रिणा प्रार्थितम्।

**<u>चक्रवात दित्वा- श्रीलंका</u>**

चक्रवातः दित्वा अद्य दुर्बलः भूत्वा दाब-क्षेत्रेण परिवर्तितः अस्ति। दित्वा चक्रवातः दक्षिणपश्चिम-बङ्गाल-खात्याः समीपस्थेषु क्षेत्रेषु दक्षिण आन्ध्र प्रदेशस्य तटेषु अस्ति। ऋतु-विभागेन चेन्नई, तिरुवल्लूर, चेङ्गलपट्टु, काञ्चीपुरम् इत्येतेषु मण्डलेषु आगामि चतुर्विंशति होरासु अतिवृष्टेः रेड्-अलर्ट् इति रक्त वर्णीया संचेताना प्रसारिता अस्ति। ऋतुविभागेन श्वः पर्यन्तं अस्मिन् प्रदेशे मत्स्य-पालन-कार्याणि पूर्णतया अवरोधयितुं निर्देशः प्रदत्तः अस्ति। आपत्-प्रबन्धन-केन्द्रेण उक्तं यत् श्रीलङ्का-देशे दित्वा-चक्रवातस्य अनन्तरं व्यापकरूपेण विनाशे मृतकानां सङ्ख्या दशाधिक-चतुःशतं यावत् वर्धिता, अधुनापि षट्त्रिंशोत्तर त्रिशतं यावत् जनाः लुप्ताः सन्तीति।

**<u>बिहार विधानसभा अध्यक्ष</u>**

भाजपेति दलस्य वरिष्ठः नेता डा. प्रेमकुमारः अष्टादश-तमे बिहारविधानसभायाः नूतनः अध्यक्षः निर्वाचितः। प्रोटेम्-स्पीकरः नरेन्द्र-नारायण-यादवः अद्य विधानसभायाः सत्रस्य द्वितीये दिने सर्वसम्मत्या निर्वाचनस्य घोषणाम् अकरोत्। सः निर्विरोधं निर्वाचितः। उल्लेखनीयम् यत् भाजपेति दलस्य

वरिष्ठः नेता डा. प्रेमकुमारः गया-नगर-विधानसभाक्षेत्रात् नवमवारं विधायकः निर्वाचितः अस्ति। सः पूर्ववर्तीषु अनेकेषु सर्वकारेषु विभिन्नेषु मन्त्रीपदेषु स्थितवान् अस्ति।

**।।इति वार्ता:।।**